श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकुमारवरददेशिक विरचिता

# ॥ श्रीमद्वेदान्तदेशिक दिनचर्या ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक दिनचर्या ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे ॥

काञ्चीपुरी यस्य हि जन्मभूमिः
विहारभूर्वेङ्कटभूधरेन्द्रः।
वासस्थली रङ्गपुरी तमीड्यं
श्रीवेङ्कटेशं गुरुमाश्रयामः ॥ 1 ॥

संभावना यस्य हि कालकूटः
सभा भुजङ्गी कुणपं तरुण्यः।
स्याद्रौरवं राजगृहं स जीयात्
चिरं गुरुर्वेङ्कटनाथनामा ॥ 2 ॥

यः प्रातरभ्येत्य हरिं शुचीनि
द्रव्याण्युपादाय शुचिः कृतेज्यः।
स्वाध्याययुक्तो निशि योगरूपां
निद्रां समारोहति तं नतास्स्मः ॥ 3 ॥

यामे तुरीये यतवाग्रजन्याः
विहाय शय्यां विहिताङ्घ्रि शुद्धिः।
योऽत्यादरेणाऽऽस्थितयोगशेषः
तं वेङ्कटेशं गुरुमाश्रयामः ॥ 4 ॥

ततोऽनुसन्धाय ततिं गुरूणां
तं चापि देवं रमणं रमायाः।
तत्कालयोग्यानि तथाविधानि
हृद्यानि पद्यानि पठन्तमीडे ॥ 5 ॥

उत्थाय गेहादुपगम्य रम्यां
कवेरकन्यां कलिताङ्घ्रिशुद्धिः।
ततो विशोध्याऽप्सु निमज्ज्य शुभ्रं
वस्त्रं वसानं तमहं स्मरामि ॥ 6 ॥

धृत्वोर्ध्वपुण्ड्राणि सरोजबीज -
मालामवन्ध्यां समुपास्य सन्ध्याम्।
सावित्रमीशं सवितुस्त्वथर्चा
स्तुवन्तमेकाग्रधिया स्तुवे तम् ॥ 7 ॥

ततस्स पौर्वाह्णिकनित्यकर्म
निर्वर्त्य नित्येष्टनिवृत्तिमार्गः।
श्रीरङ्गधामोपसमेत्य सेवा -
क्रमेण रङ्गेश्वरपादमूलम् ॥ 8 ॥

प्राबोधिकीभिः प्रतिबोध्य गीर्भिः
प्रसाद्य तद्द्रव्यमुखैः प्रबन्धैः।
आशास्य तन्मङ्गळमाप्तवाक्यैः
आपादचूडं कलयन्तमीडे ॥ 9 ॥

तीर्थप्रसादादिकमत्र लब्ध्वा
विज्ञाप्य देवाय ततो विसृष्टः।
शनैरुपेत्याऽऽश्रमकल्पमात्म -
गृहं सुखासीनमहं स्मरामि ॥ 10 ॥

व्याख्यानशालामुपगम्य चाथ
    शिष्याननन्यान् श्रवणाभिमुख्यान्।
सङ्ग्राहयन्तं सकलानि तन्त्राणि
    अतन्द्रितं तं गुरुमाश्रयेऽहम्॥ **11** ॥

तास्संस्कृतद्रामिडदिव्यसूक्तीः
    प्रसन्नगंभीरतया प्रसिद्धाः।
तत्तद्रुचिभ्यस्तनयाविशेषं
    प्रणौमि दान्तं प्रतिपादयन्तम्॥ **12** ॥

शिष्यैरुपादानपरैरनन्यैः
    समर्पितं भक्तिपुरस्सरं यत्।
तेनैव शुद्धेन यथोदितेन
    तुष्यन्तमीडे तुषतुल्यरुक्मम्॥ **13** ॥

इत्थं ह्युपादाय च शास्त्रशिक्षां
    तां चाप्युपादानपदे निवेश्य।
माध्याह्निकं कर्म समाप्य पश्चात्
    वन्दे यजन्तं वरदं सदारम्॥ **14** ॥

अतस्करग्राह्यपवित्रपात्रैः
    अनिन्द्रियोन्मादकरैर्हविर्भिः।
आराध्य देवं कमलासहायं
    आराधये तं विहितानुयागम्॥ **15** ॥

यामे चतुर्थे निहतारिवर्गं
    प्रबन्धनिर्माणविलोकनाद्यैः।
तथा पुराणाद्यवलोकनैश्च
    कालं क्षिपन्तं कलये गुरुं तम्॥ **16** ॥

सायन्तनं कर्म समाप्य पश्चात्
समेत्य च श्रीवरदाह्वयस्य।
सहान्तरङ्गैः कुलदैवतस्य
समीपमारात् प्रणतं स्मरामि ॥ 17 ॥

आशास्य तन्मङ्गळमच्युतस्य
तत्तत्प्रबन्धैश्च तदीयपङ्क्तिम्।
स्तुत्वैकतानं प्रतिगृह्य तीर्थ -
प्रसादमेनं कृतकृत्यमीडे ॥ 18 ॥

अथान्तरङ्गैरुपदेवगेहं
अध्यास्य पीठं सरसैर्वचोभिः।
तेषां सुसूक्ष्मार्थविशेषशिक्षां
कुर्वाणमीडीमहि वेङ्कटेशम् ॥ 19 ॥

शिष्याननुज्ञाप्य सुसूक्ष्मबुद्धीन्
कृतप्रणामान् कृपया गृहेभ्यः।
अध्यास्य शुद्धं शयनीयमत्र
योगाय सन्नद्धमहं स्मरामि ॥ 20 ॥

हृत्पुण्डरीके वरदं सदारं
निवेश्य तत्पादसरोजयुग्मे।
आबद्धचित्तं सुसुखं शयानं
आराधये देशिकमस्मदीयम् ॥ 21 ॥

योगस्वरूपामनुभूय निद्रां
यामे तुरीये प्रतिबुध्य भूयः।
स्वस्वामिभावाकलनात्मयोगं
भजे भजन्तं गुरुवेङ्कटेशम् ॥ 22 ॥

इत्येवमेतामिह सर्वतन्त्र
    स्वतन्त्रवेदान्तगुरूत्तमस्य।
नित्याभिजप्यां शुभनित्यचर्यां
    जपन्ति ये ते दुरितं तरन्ति॥ **23** ॥

॥ इति श्रीमद्वेदान्तदेशिक दिनचर्या समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥